# Shri Yoga Kalpadruma

# શ્રીયોગકલ્પદ્રુમ

## Document Information

Text title : yogakalpadruma

File name : yogakalpadruma.itx

Category : yoga

Location : doc_yoga

Author : Swami Brahmananda

Transliterated by : Ameya Sakhare amaybsakhare at gmail.com

Proofread by : Ameya Sakhare amaybsakhare at gmail.com, NA

Description/comments : See elaborate Hindi commentary on each verse in the link

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીયોગકલ્પદ્રુમ

ૐ ગં ગણપતયે નમઃ ।

અથ શ્રીયોગકલ્પદ્રુમપ્રારમ્ભઃ ।

મઙ્ગલમ્ ।

(વંશસ્થં વૃત્તમ્)

પ્રણમ્ય યોગીન્દ્રહૃદઙ્ઘ્રિપઙ્કજં
મહેશ્વરં શેષમુખાનૃષીંસ્તથા ।
બ્રવીમિ યોગાગમસારમદ્ભુતં
સુસાધકાક્લેશવિબોધસિદ્ધયે ॥ ૧॥

(બસન્તતિલકા વૃત્તમ્)

હૃદ્ભૂભવો નિગમબોધસુમૂલકો દ્વિ-
સ્કન્ધઃ ષડુન્નતલતશ્ચ યમાદિપર્ણઃ ।
ધ્યાનાદિપુષ્પલલિતશ્ચ વિમોક્ષસસ્યઃ
સર્વાર્થદો જયતિ યોગસુરદ્રુમોયમ્ ॥ ૨॥

(ઇન્દ્રવંશા વૃત્તમ્)

આવૃત્ત્યરાગૌ પુરુષાણ્ડજન્મનઃ
પક્ષૌ વદન્તીહ સમાધિવિત્તમાઃ ।
યોગાતતાકાશસુખાધિરોહણં
નૂનં તયોર્નાન્યતરેણ સિદ્ધ્યતિ ॥ ૩॥

(દ્રુતવિલમ્બિતં વૃત્તમ્)

જનનનાશજરોગ્રવનેચરં
ત્રિવિધતાપકુકણ્ટકસઙ્કુલમ્ ।
ઉપરમેત તૃષોગ્રદવાનલં
જગદરણ્યમવેક્ષ્ય સુધીરધીઃ ॥ ૪॥

(દ્રુતવિલમ્બિતં વૃત્તમ્)

સમપહાય તુ દોષદૃશાખિલં
વિજનદેશગતો ગતસાધ્વસઃ ।
સમુપકલ્પ્ય શુભાસનમાત્મનો
દૃઢમતિઃ ક્રમશસ્તુ સમભ્યસેત્ ॥ ૫॥

(ઇન્દ્રવંશા વૃત્તમ્)
જ્ઞાનં વદન્તીહ વિમોક્ષકારણં
તજ્જાયતે નૈવ વિલોલચેતસિ ।
લૌલ્યં ન યોગેન વિના પ્રશામ્યતિ
તસ્માત્તદર્થં હિ યતેત સાધકઃ ॥ ૬॥

(વંશસ્થ વૃત્તમ્)
હઠો લયો માન્ત્રિકરાજ સંજ્ઞિતૌ
ચતુર્વિધં યોગમબાલિશાવિદુઃ ।
ત્રયોऽપિ રાજોપગતા ભવન્ત્યત-
સ્તદર્થમેવેહ યતેત કોવિદઃ ॥ ૭॥

(વંશસ્થં વૃત્તમ્)
જગુસ્તદઙ્ગાષ્ટકમુત્તમાશયા
યમાદિસંજ્ઞં યમિવર્યસેવિતમ્ ।
સમાસતસ્તસ્યફલં ચ લક્ષણં
વદામિ વૃદ્ધર્ષિમતાનુરોધતઃ ॥ ૮॥

(વંશસ્થં વૃત્તમ્)
અહિંસનં સત્યમચૌર્યમાર્જવં
ક્ષમા ધૃતિશ્શૌચમુપસ્થનિગ્રહઃ ।
મિતાશનં દીનજનાનુકમ્પનં
યમા દશૈતે મુનિવર્યસમ્મતાઃ ॥ ૯॥

(વંશસ્થં વૃત્તમ્)
જપસ્તપો દાનમથાગમશ્રુતિ-
સ્તથાસ્તિકત્વં વ્રતમીશ્વરાર્ચનમ્ ।
યથામિતોષોમતિરપ્યપત્રપા
બુધૈર્દશૈતે નિયમાઃ સમીરિતાઃ ॥ ૧૦॥

(વંશસ્થં વૃત્તમ્)

સ્ખલત્યસૌ નૈવ યદા કથઞ્ચના-
ચલાશયોઽહિંસનમુખ્યશીલતઃ ।
તદા તુ તજ્જાનિ ફલાન્યુપાશ્નુતે-
ઽવિરોધમુખ્યાન્યચિરાદુદારધીઃ ॥ ૧૧ ॥

(ઇન્દ્રવંશા વૃત્તમ્)
પીઠાન્યનલ્પાનિ વદન્તિ યોગિન-
સ્તેષાં ચતુષ્કં તુ તથોત્તમોત્તમમ્ ।
તત્રાપિ યત્સ્થૈર્યસુખાવહં ભવે-
તચ્ચૈવ યોગેપ્સુરિહાભ્યસેત્સદા ॥ ૧૨ ॥

(દ્રુતવિલમ્બિતં વૃત્તમ્)
અનલસત્વમુપસ્થબલક્ષયો-
ઽનિલનિરોધપટુત્વમનૂર્મિતા ।
પવનમન્થરતાપ્યુપજાયતે
સ્થિરમતેરિહપીઠજયાત્કિલ ॥ ૧૩ ॥

(વંશસ્થં વૃત્તમ્)
તતોઽનિલાયામચતુષ્કમભ્યસે-
દહર્નિશં રેચકમુખ્યસંજ્ઞકમ્ ।
ક્રિયાભિરાશુદ્ધતનુર્મિતક્રિયઃ
શનૈશ્શનૈર્દેશિકવાક્યચોદિતઃ ॥ ૧૪ ॥

(વંશસ્થં વૃત્તમ્)
શિરાવિશુદ્ધિર્જઠરાનલોન્નતિ-
સ્તથાક્ષદોષાપચયોંઽગલાઘવમ્ ।
સુશક્તિબોધો મનસશ્ચ યોગ્યતા
વિધારણા સ્વસ્ય તતોભિજાયતે ॥ ૧૫ ॥

(ઇન્દ્રવંશા વૃત્તમ્)
ભોગોન્મુખાક્ષૌઘનિવર્ત્તનં સદા-
ઽસંસર્ગતો દોષદૃશા ચ દીર્ઘયા ।
સંસ્થાપનં યચ્ચ મનોનુરોધતો
યોગસ્ય તત્પઞ્ચમમઙ્ગમીરિતમ્ ॥ ૧૬ ॥

(વંશસ્થં વૃત્તમ્)

સુરપ્રસાદો મનસઃ પ્રસન્નતા
તપઃપ્રવૃદ્ધિસ્ત્વપિ દૈન્યસંક્ષયઃ ।
દ્રુતં પ્રવેશશ્ચ તથૈવ સંયમે
જિતેન્દ્રિયસ્યેહ કિલોપજાયતે ॥ ૧૭॥

(વંશસ્થં વૃત્તમ્)
હૃદાદિદેશેષુ વિકૃષ્ય સર્વતો
વિધારણં યન્મનસોऽસ્થિરાત્મનઃ ।
મુહુર્મુહુર્ધૈર્યમિહાવલમ્બ્ય વૈ
સુધારણા સા વિબુધૈરુદીરિતા ॥ ૧૮॥

(ઇન્દ્રવંશા વૃત્તમ્)
વૃત્ત્યેકતાનત્વમખણ્ડિતં તુ ય-
ત્તત્રાન્યસઙ્કલ્પવિકલ્પજાલકૈઃ ।
તૈલસ્ય ધારેવ સમાધિગોપુરં
ધ્યાનં તદેવાહુરદીનચેતસઃ ॥ ૧૯॥

(ઇન્દ્રવંશા વૃત્તમ્)
ધ્યેયસ્વરૂપોપગતં યદા મનો
વિસ્મૃત્ય ચાત્માનમથાવતિષ્ઠતે ।
સઙ્કલ્પપૂગાપગતં તમન્તિમં
યોગસ્ય સન્તોऽવયવં પ્રચક્ષતે ॥ ૨૦॥

(ઇન્દ્રવંશા વૃત્તમ્)
એતત્ત્રયં સંયમમાહુરુત્તમા
યોગસ્ય મુખ્યં કરણં સુદુર્ગમમ્ ।
સિદ્ધ્યાऽસ્ય સિદ્ધ્યોઘમિહાશ્નુતેઞ્જસા
યોગંવિશત્યપ્યચિરં મહાશયઃ ॥ ૨૧॥

(ઇન્દ્રવંશા વૃત્તમ્)
વૈરાગ્યમાશ્રિત્ય પરં તથેશ્વરા
ધ્યાનેન વિઘ્નાનખિલાઞ્જયેદ્યમી ।
સંક્ષિપ્ય ચેતઃપરમાત્મસદ્મનિ
સઞ્ચિન્તયેદેકમથોત્તમાક્ષરમ્ ॥ ૨૨॥

(ઇન્દ્રવંશા વૃત્તમ્)

સંવિશ્ય યોગં પરમં તુ ધીરધી-
રેકત્વમાનીય તથાત્મચેતસોઃ ।
પ્રોત્સાર્ય સઙ્કલ્પવિકલ્પસઞ્ચયં
કિઞ્ચિત્સ્મરેન્નૈવ તતસ્ત્વતન્દ્રિતઃ ॥ ૨૩॥

(ઇન્દ્રવંશા વૃત્તમ્)
ઇત્થં પરાનન્દપદાર્પિતાશયો
યોગીવિલૂનાખિલકર્મબન્ધનઃ ।
સ્વૈરશ્ચિરં સંવિચરત્યુદારધી-
રત્રૈવ વાઽમુત્ર વિમુચ્યતેઽથવા ॥ ૨૪॥

(દ્રુતવિલમ્બિતં વૃત્તમ્)
પરમયોગરહસ્યમિતીરિતં
પરમહંસજનેન સમાસતઃ ।
પઠતિ યશ્ચ સમાચરતીહ વૈ
પતતિ જાતુ સ નોગ્રભવાર્ણવે ॥ ૨૫॥

ઇતિ શ્રીમત્પરમહંસસ્વામિબ્રહ્માનન્દવિરચિતો
યોગકલ્પદ્રુમઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Ameya Sakhare amaybsakhare at gmail.com

*Shri Yoga Kalpadruma*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*